# Dharmapuri Ramalingeshvara Mangalashasanam

# श्रीधर्मपुरीरामलिङ्गेश्वर मङ्गलाशासनम्

## Document Information

Text title : Dharmapuri Ramalingeshvara Mangalashasanam

File name : dharmapurIrAmaliNgeshvaramaNgalashAsanam.itx

Category : shiva, koriDevishvanAthasharmA

Location : doc_shiva

Author : koriDe vishvanAthasharmA, dharmapurI

Transliterated by : koriDe vishvanAthasharmA

Proofread by : koriDe vishvanAthasharmA

Acknowledge-Permission: Koride Vishwanatha Sharma

Latest update : February 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# श्रीधर्मपुरीरामलिङ्गेश्वर मङ्गलाशासनम्

अथ श्री धर्मपुरीरामलिङ्गेश्वर मङ्गलाशासनम्
एकस्मै जगतां भर्त्रे ह्यनेकाकृतिशोभने ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ १॥

द्विजिह्व गलभूषाय द्विजेन्द्राश्रितमौलये ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ २॥

त्रिनेत्राञ्चितरूपाय त्रिशूलायुधधारिणे ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ३॥

चतुरास्यसुसेव्याय चतुर्वेदस्वरूपिणे ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ४॥

पञ्चास्यशोभिने तस्मै पञ्चबाणविमर्दिने ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ५॥

षड्दर्शनैः सुवेद्याय षडानननुताय च ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ६॥

सप्तर्षिवर्यगीताय सप्ताश्वरथचक्षुषे ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ७॥

अष्टमूर्तिस्वरूपाय ह्यष्टैश्वर्य प्रदायिने ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ८॥

नवग्रहाणां शास्त्रे च नव द्रव्यात्मकाय च ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ९॥

दशदिग्व्याप्तदेहाय दशास्येन नुताय च ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ १०॥

एकादशात्मरुद्राय ह्येकादशाघनाशिने ।

मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ ११॥

दाक्षायणी प्रियङ्कर्त्रे दक्षयज्ञविनाशिने ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ १२॥

पार्वतीहृतदेहाय पर्वताग्रनिवासिने ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ १३॥

यतीन्द्रप्रवारा यं हि नित्यं ध्यायन्ति तत्पराः ।
मङ्गलं धर्मपूर्वास ! रामलिङ्गेश्वराय ते ॥ १४॥

मयाहि कोरिडे कुलीन विश्वनाथशर्मणा
    मुदा कृतं तु रामलिङ्ग सुप्रभात सेवनम् ।
शिवाय चास्तु मोदकं प्रपाठकाय मोक्षदं
    भवेन्नुताय शङ्करं सदा ह्यरिष्ट नाशकम् ॥ १५॥

श्री धर्मपुरवास्तव्य कोर्डे वंशोद्भवेन हि ।
राजन्नशास्त्रि पुत्रेण विश्वनाथेन शर्मणा ॥ १६॥

कृता हि वाङ्मयी पूजा शिवानुग्रहकाङ्क्षिणा ।
शिवाय प्रीतिदा भूयात् पाठकाय शिवङ्करी ॥ १७॥

इति संस्कृतसाहित्यरत्नपदलाञ्छनस्य,
बुधकोटिनुतस्य, प्रथितकविपण्डितगणाग्रणीवरस्य,
अखिलशिष्यकोटिवृन्दार्चितपादपद्मयुगलस्य,
आचार्यकोरिडेराजन्नशास्त्रिणः द्वितीयपुत्रेण कोरिडे विश्वनाथ शर्मणा
विरचिता श्रीधर्मपुरीरामलिङ्गेश्वर वाङ्मयीपूजा समाप्ता ॥

Composed by Koride Vishwanatha Sharma, Dharmapuri, Telangana
Proofread by Koride Vishwanatha Sharma.

*Dharmapuri Ramalingeshvara Mangalashasanam*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*